शोध-शीर्षक

“नैषधीयचरिते शब्दानुमानप्रमाणयोः समीक्षात्मकम् अध्ययनम्”

स्नातकोत्तर संस्कृत विभाग, राँची विश्वविद्यालय, राँची विश्वविद्यालय से पीएच.डी उपाधि हेतु प्रस्तुत

शोध प्रारूप

शोधनिर्देशिका

डा.निमिषा कुमारी
सहायक प्राध्यापिका एवं अध्यक्ष
संस्कृतविभागः
डोरण्डा कालेज,राँची

शोधकर्त्री

सोनीया घोषाल
एम.ए,नेट(जे.आर.एफ)

शोधस्य आवश्यकता:- महाकबिश्रीहर्षेण विरचिते नैषधचरितमहाकाव्ये कवेःअनुमानः शब्दप्रमाणश्च धारणाविषये चर्चा अद्यावधि पृथकरूपेण न आलोचितबन्तः। परन्तु कवेः काव्ये दार्शनिकभावनाः

निश्चितरूपेण आलोचनीयम्। पूर्वकृता गवेषणामूलकग्रन्थानां यथायोग्यं पर्यालोचनां कृत्वा वर्तमानशोधपत्रे कवेःअनुमानःशब्दप्रमाणश्च धारणां पृथक् रूपेण प्रदर्शितं भविष्यति। यद्यपि दर्शनं काव्यं च द्वौ भिन्नौ क्षेत्रौ स्तः तथापि कविप्रतिभया द्वयोः भिन्नक्षेत्रयोः अद्भुतसमागमः नैषधचरितम् महाकाव्ये दृश्यते। मया स्वदृष्टिभ्यां प्रबन्धे अस्मिन् सुसंबद्धरूपेण द्वयोः प्रमाणयोः धारणां भवितुं शक्यते।

<u>प्रस्तावणा:-</u> कालिदासोत्तर कवीनां श्रीहर्षः अन्यतमः। तस्य परिचयविषये यद्यपि समालोचना विद्यते तदपि ''नैषधचरितम' इति महाकाव्यस्य रचयिता श्रीहर्षः, तस्य परिचयविषये महाकाव्यस्य प्रति सर्गात् इति उल्लेखं करोति

"श्रीहर्षः कविराजराजिमुकुटालंकारहीरः सुतं

श्रीहीर**:** सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्। "

'अतः श्रीहीरः मामल्लदेव्याः अलंकारतुल्य श्रीहर्षः संस्कृतसाहित्यालंकारं करोति।

द्वाविंशसर्गविशिष्ठ नैषधचरितम् इति महाकाव्याय कृते श्रीहर्षः कान्यकुब्जेश्वरः श्रेष्ठः ताम्वुलस्वरूपः सार्वभौमादि आसने प्रतिष्ठितः।

"ताम्बुलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्। "(तै. च 22.155)

महाभारतस्य वनपर्वस्य नलोपाख्यानात् नाममात्रकाहिनीं नीत्वा आत्मप्रतिभाया द्वाविंशसर्गे प्रस्फुटितमकरोत्। श्रीहर्षस्य काव्यं न केवलं नाममात्रकाव्यम्, सवे प्रतिभायाः विकाशः विद्यते। अस्मिन् प्रसङ्गे पण्डितानां स्तुतिर्यथा-

"हिंस्राः सन्ति सहस्रशःअपि विपिने शोण्डीयवीयोद्धता—

स्तस्यैकस्य पुनः स्तुतीमहि महः सिंहस्य विश्वोत्तरम्।

कोलो कोलकुलैर्मदो मदकलै**:** कोलाहल ना हलैः

<u>सहर्षो</u> महिषैश्च षस्य मुमुचे साहंकतेहुङ्कृते।।"

- दर्शनं हि सर्वेषां शास्त्राणां मूलशास्त्रम्। यतो हि किम् किमर्थम् कस्मात्, कुत्र, इत्यादि उत्तरस्य अनुसन्धानमेव दर्शनम्। दर्शनम् खलु आदिशास्त्रम् इति कथ्यते। यस्य प्रमाणं श्रुतौ अपि लक्ष्यते-

"को अद्धा वेद क इह प्रवोचत् कुत अजाता कुत इयं विसृष्टिः।

अर्वागदेवा अस्य विसर्जनेनथा को वेद यत आवभुव।।" (नासदीय सुक्त10.129.6)

श्रीहर्षस्य काव्ये दार्शनिकविचारानाम् अभिव्यक्तिः सर्वत्र परिदृश्यते। दर्शनशास्त्रे तस्य निपुणतायाः कुष्टिपाथरानि निदर्शनानि वा अस्मिन् महाकाव्ये विकीर्णानि सन्ति। तादृशं एकनिदर्शनम् हि काव्ये तस्य प्रमाणधारणायाः प्रभावः।

न्यायानुसारं अनुमानं भवति –"लिङ्गपरामर्शो अनुमानम्"। लिङ्गं भवति- "व्याप्तिबलेनार्थगमकं लिङ्गम्"। व्याप्तिबलेन यस्स्य अर्थस्य बोधं भवति तत् लिङ्गम्।"तृतीयज्ञानम् परामर्शः"। तद्यथा-पर्वतो बह्निमान् धूमात्। अत्र धूमादिज्ञानं धूमावलोकनेन अग्निज्ञानम्। अतः अग्नादिज्ञानं अनुमिति, तस्य करणं धूमादिज्ञानम्। अतः अनुमानाय आवश्यकं हि लिङ्गं तथा हेतुः। परामर्शं हि तृतीयज्ञानम् लिङ्गजनितज्ञानम् वा। आलोच्य महाकाव्यस्य अनुमानधारणा प्रकाशयितुम् यदि इच्छामः तर्हि प्रथमं भीमराजकुमारी दमयन्ती इत्यस्याः निषधराजनलं प्रति पूर्वरागस्य उल्लेखं कर्तुं शक्नुमः।

"नृपे अनुरूपे निजरूपसम्पदां दिदेश तस्मिन् वहुशः श्रुतिं गते।

विशिष्य सा भीमनरेन्द्रनन्दना मनोभबाज्ञैकवशंवदं मनः।।" (नैषध 1/33)

यतः पूर्वरागस्य मूलम् एव नायकनायिकाः च परस्परं दर्शनम्।परन्तु अत्र दृश्यते यत् नायिकादमयन्त्याःनलं प्रति पूर्वरागः कच्चित् अनुमानेन जागरितं भवति। भीमराजस्य दरबारम् आगतः चारणकविभिः ब्राह्मणस्तोत्रपाठकेभ्यः नलविषयकः श्रुतैः स्तुतिभिः, शारीरिकसौन्दर्यैः, गुणैः च दमयन्ती नलं प्रति आकृष्टः भूत्वा मनसि नलस्य कल्पनां कृत्वा वा हृदये तस्य चित्रं मूर्तिं वा स्थापिता। अत्र अनुमानस्य धारणासिद्धि कथम् प्राप्नुमः इति प्रश्नस्योत्तरे वक्तुं शक्यते यत् अनुमानसिद्धया आवश्यकम् लिङ्गम् परामर्शश्च।अत्र लिङ्गरूपे वन्दिनां स्तुतिपाठकानां ब्राह्मणानां च नलसम्बन्धीय प्रशंसासुचकवचनावलीम् सूच्यते। अपि च परामर्शरूपे दमयन्त्याः नलं प्रति पूर्वरागः सूच्यते।

- न्यायदर्शने स्वार्थानुमानस्य एकः प्रसिद्धः उदाहरणं भवति - पर्वतः धूमवान्। यत्र धूमस्तत्र बह्नि। अतः पर्वतो बह्निमान्। कविः तस्य काव्यस्य चतुर्थसर्गस्य श्लोके इदं धूम-बह्न्योः नियतसाहचर्यव्याप्तिसम्बन्धस्य प्रयोगं कृतवान्। यत्र नलः दमयन्त्याः अश्रुपूरितनयनं दृष्ट्वा दमयन्त्याः हृदये नलं प्रति गहनं प्रेमसिद्धं कृतवान्।

"आप्तोपदेश शब्दः" - आप्तजनस्य उपदेशःशब्दः। आप्तार्थे "साक्षात् कृतधर्मा"। उक्तञ्च बाचस्पति मिश्रेण- "सुदृडप्रमाणेनवधारिता साक्षात् कृतधर्माः पदार्था हिताहितप्राप्तिपरिहारार्था येन"। अर्थात् यदि दृढप्रमाणेन किमपि विषये निश्चितं ज्ञानं भवति तर्हि तत् साक्षात्कारतुल्यम्। पुनः यः अनुमानेन शब्दप्रमाणेन वा सिद्धान्तं निर्धार्य तस्य सिद्धान्तस्य समर्थने यदपि वदति सः एव आप्तः-"आप्तस्तु यथार्थवक्ता"। परन्तु यः साक्षात्कारवक्ता अपि वक्तव्यप्रेषणे असमर्थं भवति स आप्तः नास्ति। यादृशं यद्वस्तु तादृशं तस्य प्रकाशं इति वाञ्छनीयम्-यथादृष्टस्यार्थस्य चिख्यापयिषया। पुनः यदि साक्षात्कारकर्ता इन्द्रियसामर्थ्यस्य अभावात् उपदेशं कर्तुं समर्थः नास्ति तर्हि सः अपि अयोग्यः इति उच्यते-उपदेष्टा- अर्थात् पूर्वोक्तलक्षणयुक्तस्य उपदेशः हि शब्दप्रमाणम्, म्लेच्छजनानां आर्यजनानां च उदाहरणानि शब्दप्रमाणानि भवन्ति। अन्यथा तेषां लौकिकप्रयोगः सिद्धः न भवितुमर्हति। अतः इति उच्यते विषयवैचित्र्ये आप्तलक्षणं सर्वेषां साभिमतम्। तस्य च उत्पत्तिः चरणकवीभिः-

“उपासनामेत्य पितुः स्म रज्यते दिनेदिने सावसरेषु बन्दिनाम्

पठत्सु तेषु प्रति भूपतीनलं विनिद्ररोमाजनि शृण्वती नलम्।।“ (नैषधचरितम् 1.34)

श्रीहर्ष तस्य महाकाव्ये शाब्दिकभावनायाः प्रकाशम् दृशयते।यथा सर्गादौ नलस्य प्रशंसासूचकवाक्यमेव दमयन्त्या अनुरागकारणम्। यस्य उत्पत्तिः चारणकविभिः।

ते चारणकवयः ये भिन्नस्थानेषु गायन्ति, यात्रां च कुर्वन्ति।. शब्दप्रमानं ज्ञानीवचनम् आप्तवचनम् च। अत्र चारणकविः आप्तव्यक्तिः यतः देशविदेशादौ ये जनाः विचरन्ति ते प्रत्यक्षदर्शी तथा साक्षात्कृतकर्मा।यदेव आप्तस्य व्याक्तेः लक्षणम्। अतः तेषां मतं केनचित् प्रत्यक्षप्रमाणेन निश्चितं भवति।अतः तेषां वर्णितस्य नलविषययस्य सूचना खलु दमयन्त्याः विश्वसनीयः अस्ति। अतः एवं सति चारणकवीनां वचनं शब्दप्रमाणं गृहीत्वा दमयन्त्याः नलप्रति पूर्वरागस्य जागरणं शब्दप्रमाणजन्यमिति वक्तुं शक्यते।

न केवलं चरणकवयः अपितु निषधभूमितः आगताः ब्राह्मणाः अपि सर्वे आप्ताः इति प्रस्तुतुं शक्यन्ते। यतः दमयन्त्याः मनसि नलस्य गुणावलीं कीर्तिं सौन्दर्यं च प्रकाशनं कृत्वा दमयन्तीं नलं प्रति प्रेमसम्पादने सहायतां कुर्वन्ति।

“नलस्य पृष्ट्वा निषधागता गुणान् मिषेण दूतद्विजवन्दिचारणाः।

निपीय तत्कीर्तीकथामथानया चिराय तस्थे विमनायमानया।।“ (नैषधचरितम् 1.37)

दूतस्य कार्यं समुचितं वाक्यं प्रदातुं भवति, अतः दूतस्य वचनं आप्तवचनं इति मन्तव्यं भवति। ब्राह्मणानां स्तुतिपाठकानां च परस्तुतिपाठकमेव तेषां कार्यम्। तस्मिन् सति तेषां वचनं योग्यस्य जनानां वचनं भवति। यतः तेषां स्व स्व जीविकायां स्पष्टं शुद्धं च चरित्रं भवति यत्र अनिष्टं भाषणं न सम्भवति। पुनः देवदूत-रूपिनलः दमयन्तीं प्रति यत् वार्ताम् उपस्थापयति दमयन्ती तत् विश्वासं कृतवती।यतः दूतस्य वचनं सर्वदा विश्वसनीयं भवति। देवानां मध्यात् एकदेवम् ग्रहणीयम् इति नलस्य मुखात् श्रुत्वा दमयन्ती अज्ञातावसरे इति प्रकाशते नलः एव एकः पुरुषः तस्याः ग्रहणीयं पुरुषं भवेत। यदि सा नलं न प्राप्यते तर्हि आत्महत्यां कर्तुं न संकोचयिष्यति। ज्ञानिनां वचनं श्रुत्वा एवं सम्भवति अर्थात् यदि कस्मिन् अपि शब्दे सर्वथा विश्वासः भवति तर्हि सम्भवति इति अपि उक्तवान्।

अतः नैषधचरितमहाकाव्ये प्रति छत्रे छत्रे शब्दप्रमाणं अनुमानप्रमाणं च परिलक्ष्यते।

शोधस्य उद्देश्यः-

1. मम मुख्य उद्देश्यं कविश्रीहर्षस्य नैषधचरितम् महाकाव्ये अनुमानं शब्दप्रमाणश्च धारणा च प्रकाशयितुं वर्तते।
2. कविकाव्ये नानादार्शनिकसिद्धान्तेषु प्रमाणसिद्धान्तं कियतमस्ति इति आलोचनीयम्।
3. अनुमानेन शब्दप्रमाणेन च काव्यस्य समृद्धिं कथं सिद्धं भवति इति आलोचनीयम्।

शोधस्य महत्वम्:- श्रीहर्षस्य नैषधाचरितकाव्ये प्रतिपत्तीनां अर्थविचारानाञ्च चर्चां कुर्वन् न्यायानुसारं प्रमाणादिके के प्रकाराः सन्ति, अन्ययोः न्यायस्य प्रमाणयोः अन्यदर्शनानां च स्वीकृतप्रमाणयोः अपि चर्चायां आवश्यकतानुसारं चर्चाकृता अस्ति ।

प्राक् कल्पना:- शोधपत्रे अध्यायनिर्माणं निम्नोक्तप्रकारं भवितुं शक्यते

प्रथमःअध्याय:- काव्ये दर्शनस्य प्रभावः

द्वितीयः अध्याय:- विविधेषु दर्शनेषु स्वीकृतानि प्रमाणतत्वानि

1. न्यायदर्शने स्वीकृतानि प्रमाणतत्वानि
2. वैशेषिकदर्शने स्वीकृतानि प्रमाणतत्वानि
3. सांख्ये स्वीकृतानि प्रमाणतत्वानि
4. योगदर्शने स्वीकृतानि प्रमाणतत्वानि
5. मीमांसादर्शने स्वीकृतानि प्रमाणतत्वानि
6. वेदान्तदर्शने स्वीकृतानि प्रमाणतत्वानि
7. नास्तिकदर्शनेषु स्वीकृतानि प्रमाणतत्वानि

तृतीयः अध्याय:- विविधेषु दार्शनिकमतेषु अनुमानप्रमाणम्

1. न्यायदर्शने अनुमानप्रमाणम्
2. वैशेषिकदर्शने अनुमानप्रमाणम्
3. सांख्ये अनुमानप्रमाणम्
4. योगदर्शने अनुमानप्रमाणम्
5. मीमांसादर्शने अनुमानप्रमाणम्
6. वेदान्तदर्शने अनुमानप्रमाणम्
7. नास्तिकदर्शनेषु अनुमानप्रमाणम्

चतुर्थः अध्यायः-विविधेषु दार्शनिकमतेषु शब्दप्रमाणम्

1. न्यायदर्शने शब्दप्रमाणम्
2. सांख्ये शब्दप्रमाणम्
3. योगदर्शने शब्दप्रमाणम्
4. मीमांसादर्शने शब्दप्रमाणम्
5. वेदान्तदर्शने शब्दप्रमाणम्

6. जैनदर्शने शब्दप्रमाणम्

पञ्चमः अध्यायः-नैषधचरितम् महाकाव्ये शब्दानुप्रमाणम्

सहायक ग्रन्धसूची

शोधकार्यसमये आवश्यकतानुसारं परिवर्तनं परिवर्धनं वा भवितुं शक्यते।

परिशीलित ग्रन्थसूची

- नैषधचरितम्-देवकुमार दास,संस्कृत पुस्तक भाण्डार,द्वितीय संस्करण-2017
- नैषधचरितम्-ड.करूणासिन्धु दास,संस्कृत साहित्य सम्भार,नवपत्र प्रकाशन
- नैषधचरितम्-त्रिभुवनप्रसाद उपाध्याय, हरगोविन्द शास्त्री,चौखम्वा संस्कृत सिरिज,वेनारस
- नैषधीयचरितम्-ड.देवर्षि सनाढ्य शास्त्री, ,चौखम्वा कृष्णदास अकादेमी,वाराणसी
- न्यायदर्शन-ड.फणीभूषण तर्कवागीश,पश्चिमवंग राज्य पुस्तक पर्षत्,पञ्चम प्रकाश-2014
- भारतीय दर्शन-यदुपति त्रिपाठी,ड.अश्रुलेखा त्रिपाठी,वि.एन.पावलिकेशन

....

शोधनिर्देशिका शोधकर्ता